एतेषां विजयं कृत्वा कार्य्यं भृत्यजयं ततः ।
कृत्वा भृत्यजयं सर्व्वं राजा जनपदं जयेत् ॥
कृत्वा तु विजयं तेषां शत्रून् बाह्यांस्ततो जयेत् ।
बाह्याश्च त्रिविधा ज्ञेयास्तुल्याभ्यन्तरकृत्रिमाः ॥
गुरवस्ते यथापूर्व्वं तेषु यत्नपरो भवेत् ।
पितृपैतामहं मित्रममित्रञ्च तथा रिपोः ॥
कृत्रिमञ्च महाभाग मित्रं त्रिविधमुच्यते ।
तथापि च गुरुः पूर्व्वं भवेत्तत्रापि चाहृतः ॥
स्वाम्यमात्यो जनपदो दुर्गं सैन्यन्तथैव च ।
कोषो मित्रञ्च धर्म्मज्ञ सप्ताङ्गं राज्यमुच्यते ॥
सप्ताङ्गस्यापि राज्यस्य मूलं स्वामी प्रकीर्त्तितः ।
तन्मूलत्वात्तथाङ्गानां राजा रक्ष्यः प्रयत्नतः ।
षड़ङ्गरक्षा कर्त्तव्या तथा तेन प्रयत्नतः ॥
अङ्गेभ्यो यस्तथैकस्य द्रोहमाचरतेऽल्पधीः ।
वधस्तस्य तु कर्त्तव्यः शीघ्रमेव महीक्षिता ॥
न राज्ञा मृदुना भाव्यं मृदुर्हि परिभूयते ।
न भाव्यं दारुणेनापि तीक्ष्णादुद्विजते जनः ॥
काले मृदुर्यो भवति काले भवति दारुणः ।
राजा लोकद्वयापेक्षी तस्य लोकद्वयं भवेत् ॥
भृत्यैः सह महीपालः परिहासं विवर्ज्जयेत् ।
भृत्याः परिभवन्तीह नृपं हर्षवशं गतम् ॥
व्यसनानि च सर्व्वाणि भूपतिः परिवर्ज्जयेत् ।
लोकसंग्रहणार्थाय कृतकव्यसनो भवेत् ॥
शौटीरस्य नरेन्द्रस्य नित्यमुद्रिक्तचेतसः ।
जना विरागमायान्ति सदा दुःसेव्यभावतः ॥
स्मितपूर्व्वाभिभाषी स्यात् सर्व्वस्यैव महीपतिः ।
वध्येष्वपि महाभाग भ्रुकुटीं न समाचरेत् ॥
भाव्यं धर्म्मभृतां श्रेष्ठ स्थूललक्ष्येण भूभुजा ।
स्थूललक्ष्यस्य वशगा सर्व्वा भवति मेदिनी ॥
अदीर्घसूत्रश्च भवेत् सर्व्वकर्म्मसु पार्थिवः ।
दीर्घसूत्रस्य नृपतेः कर्म्महानिर्ध्रुवं भवेत् ॥
रागे दर्पे च माने च द्रोहे पापे च कर्म्मणि ।
अप्रिये चैव कर्त्तव्ये दीर्घसूत्रः प्रशस्यते ॥
राज्ञा संवृतमन्त्रेण सदा भाव्यं द्विजोत्तम ।
तस्यासंवृतमन्त्रस्य ज्ञेयाः सर्व्वापदो ध्रुवाः ॥
कृतान्येव तु कर्म्माणि जायन्ते यस्य भूपतेः ।
नारब्धानि महाभाग तस्य स्यादृसुधा वशे ॥
मन्त्रमूलं सदा राज्यं तस्मान्मन्त्रं सुरक्षितम् ।
कर्त्तव्यं पृथिवीपालैर्मन्त्रभेदभयात् सदा ॥
मन्त्रवित् साधितो मन्त्रः संपतानां सुखावहः ।
मन्त्रच्छलेन बहवो विनष्टाः पृथिवीक्षितः ॥
आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च ।
नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः ॥
नयस्य कुशलस्तस्य वशे सर्व्वा वसुन्धरा ।
भवतीह महीभर्त्तुः सदा पार्थिवनन्दन ॥
नैकस्तु मन्त्रयेन्मन्त्रं न राजा बहुभिः सह ।
नारोहेद्विषमां नावं नापरीक्षितनाविकाम् ॥
ये चास्य भूमिं जयतो भवेयुः परिपन्थिनः ।
तानानयेद्वशे सर्व्वान् सामादिभिरुपक्रमैः ॥
यथा न स्यात् कृशीभावः प्रजानामनपेक्षया ।
तथा राज्ञा प्रकर्त्तव्यं स्वराष्ट्रपरिरक्षता ॥
मोहाद्राजा स्वराष्ट्रं यः कर्षयत्यनपेक्षया ।
सोऽचिराद्भ्रश्यते राज्यात् जीविताच्च सबा-
न्धवः ॥
भृतो वत्सो जातबलः कर्म्मयोग्यो यथा भवेत् ।
तथा राष्ट्रं महाभाग भृतं कर्म्मसहं भवेत् ॥
यो राष्ट्रमनुगृह्णाति राज्यं स्वं परिरक्षति ।
संघातमुपयाद्वेत्तु विन्दते स महत् फलम् ॥
राष्ट्राद्धिरण्यं धान्यञ्च महीं राजा सुरक्षिताम् ।
महता तु प्रयत्नेन स्वराष्ट्रस्य च रक्षिता ॥
नित्यं स्वेभ्यः परेभ्यश्च यथा माता यथा पिता ।
गोपितानि सदा कुर्य्यात् स विभागी प्रियाणि
च ॥
अजस्रमुपयोक्तव्यं फलं तेभ्यस्तथैव च ।
धर्म्मकर्म्मेदमायत्तं विधाने दैवमानुषे ।
तयोर्दैवमचिन्त्यं हि पौरुषे विद्यते क्रिया ॥
एवं महीं पालयतोऽस्य भर्त्तु-
र्लोकानुरागः परमो भवेच्च ।
लोकानुरागप्रभवा च लक्ष्मी-
र्लक्ष्मीवतश्चैव परा च कीर्त्तिः ॥”
इति मात्स्ये २०० अध्यायः ॥

राजपुत्रिका, स्त्री, (राजपुत्री+संज्ञायां कन् ।) शरारिपक्षी । शराली इति भाषा ॥ यथा,—
“शरारिराटिराड़िश्च हापुत्री राजपुत्रिका ॥”
इति जटाधरः ॥
राजकन्या च ॥ (यथा, हरिवंशे । २५ । ४६ ।
“उत्पादयामास ततः पुत्त्रं वै राजपुत्त्रिका ॥”)

राजपुत्त्री, स्त्री, (राज्ञः पुत्त्रीव ।) कटुतुम्बी । रेणुका । जाती । राजरीतिः । छुछुन्दरी । इति राजनिर्घण्टः ॥ मालती । यथा,—
“अतिमुक्तश्चाथ जातिर्मालती सुमना अपि ॥”
राजपुत्त्री मनोज्ञा——॥” इति जटाधरः ॥
राजकन्या च ॥ (यथा, महाभारते ।१।७३।१।
“सुव्यक्तं राजपुत्त्री त्वं यथा कल्याणि ! भाषसे ।
भार्य्या मे भव सुश्रोणि ! ब्रूहि किं करवाणि
ते ॥”)

राजपुष्पः, पुं, (पुष्पाणां राजा । राजदन्तादित्वात् परनिपातः ।) नागकेशरपुष्पवृक्षः । यथा,—
“चाम्पेयः केशरो नागकेशरः कनकाह्वयः ।
महौषधं राजपुष्पः फलकः खरघातनः ॥”
इति शब्दचन्द्रिका ॥

राजपुष्पी, स्त्री, (राजप्रियं पुष्पमस्याः । ङीप् ।) करुणीवृक्षः । इति राजनिर्घण्टः ॥

राजप्रिया, स्त्री, (राज्ञः प्रिया ।) करुणीवृक्षः । इति राजनिर्घण्टः ॥

राजफणिज्झकः, पुं, (राजते इति । राज्+अच् । राजो दीप्तिशाली फणिज्झकः ।) नागरङ्गवृक्षः । इति शब्दमाला ॥

राजफलं, क्ली, (राजाभिधेयं फलम् ।) पटोलम् । इति त्रिकाण्डशेषः ॥

राजफला, स्त्री, (राजप्रियं फलमस्याः ।) जम्बूः । इति राजनिर्घण्टः ॥

राजबदरं, क्ली, (राज्ञो बदरमिव प्रियत्वात् ।) रक्तामलकम् । लवणम् । इति मेदिनी ॥

राजबदरः, पुं, (बदराणां राजा । राजदन्तादित्वात् परनिपातः ।) उत्तमकोलिः । तत्पर्य्यायः । नृपश्रेष्ठः २ नृपबदरः ३ राजवल्लभः ४ पृथुकोलः ५ तनुबीजः ६ मधुरफलः ७ राजकोलः ८ । अस्य गुणाः । सुमधुरत्वम् । शिशिरत्वम् । दाहार्त्तिपित्तवातहरत्वम् । वृष्यत्वम् । वीर्य्यवृद्धिकरत्वत् । शोषश्रमनाशित्वञ्च । इति राजनिर्घण्टः ॥

राजबीजी, [न्] त्रि, (राजा बीजी कारणं यस्य ।) राजवंश्यः । इत्यमरः । २ । ७ । २ ॥

राजभट्टिका, स्त्री, हापुत्रीपक्षी । यथा,—
“गोभण्डीरः पङ्ककीरो हापुत्री राजभट्टिका ॥”
इति जटाधरः ॥

राजभद्रकः, पुं, कुष्ठम् । निम्बः । इति राजनिर्घण्टः ॥ पारिभद्रकः । इति साधुपाठः ॥

राजभूयं, क्ली, (राज्ञो भावः । राजन्+भू+क्यप् ।) राजत्वम् । यथा,—
“स्याद्ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यपि ।
देवभूयादिकं तद्वत् ।” इत्यमरकोषदर्शनात् ॥

राजभोग्यं, क्ली, (राज्ञा भोक्तुं योग्यम् । भुज्+ण्यत् । कुत्वञ्च ।) जातीकोषम् । प्रियालवृक्षे, पुं । इति शब्दचन्द्रिका ॥

राजमण्डूकः, पुं, (मण्डूकानां राजा । राजदन्तादित्वात् परनिपातः ।) हृहङ्कः । बड़ बेङ् इति भाषा । तत्पर्य्यायः । महामण्डूकः २ पीताङ्गः ३ पीतमण्डूकः ४ वर्षाघोषः ५ महारवः ६ । इति राजनिर्घण्टः ॥

राजमल्लः, पुं, राज्ञां मल्लः । राजार माल् इति भाषा । तत्पर्य्यायः । उल्लिक्तः २ उद्धतः ३ । इति त्रिकाण्डशेषः ॥

राजमार्गः, पुं, (राज्ञो मार्गः ।) राजपथः । तद्विवरणं यथा,—
“राजमार्गं सौधयुक्तं यः करोति पतिव्रते ।
वर्षाणामयुतं सोऽपि शक्रलोके महीयते ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २४ अध्यायः ॥
अपि च ।
“त्रिंशद्धनूंषि विस्तीर्णो देशमार्गस्तु तैः कृतः ।
विंशं धनुर्ग्राममार्गः सीमामार्गो दशैव तु ॥
धनूंषि दश विस्तीर्णः श्रीमान्राजपथः कृतः ।
नृवाजिरथनागानामसम्बाधः सुसञ्चरः ॥
धनूंषि चैव चत्वारि शाखारथ्यास्तु निर्म्मिताः ।
त्रिकराश्चोपरथ्यास्तु द्विकराप्युपरथ्यका ॥
जङ्घापथश्चतुष्पादस्त्रिपादश्च गृहान्तरम् ।
वृतीपादस्त्वर्द्धपादः प्राग्वंशः पादकः स्मृतः ।
अवकरः परिवारः पादमात्रः समन्ततः ॥”
इति देवीपुराणे गोपुरद्वारलक्षणं नामाध्यायः ॥
(अत्रामेध्योत्सर्गे दण्डविधानं कर्त्तव्यम् । यथा, मनुः । ९ । २८२ ।
“समुत्सृजेत् राजमार्गे यस्त्वमेध्यमनापदि ।
स द्वौ कार्षापणौ दद्यादमेध्याञ्चाशु शोधयेत् ॥”
नीतिः । यथा, हरिवंशे भविष्यपर्व्वणि । ५४ । २ ।